किं संज्ञैव । नैवम् । प्राण्यवयवोऽप्ययं मध्यमस्य पुरुषस्य मध्यमाया अङ्गुल्या मध्यमो भाग एवंप्रकारः । एवंप्रकर्षौ वा (मध्यम)प्रमाणस्यायमेव स्यात् । तेनैव अष्टयवमध्यप्रमाणाङ्गुलेन मध्यमत्वम् । अतो(ऽधिक ?)न्यूनाधिकत्वं बोद्धव्यम् । चतुर्हस्तप्रमाणश्च मध्यमः पुमानिति । चतुरङ्गुलो धनुर्ग्रहः संज्ञैव ॥

T. 264. द्वादशाङ्गुला वितस्तिः । छाया (वज्रो?भिज्ञा)नार्थां छाया पुरुषद्वादशाङ्गुलमेव । शमः[1] शलः परिरयः पदं[1] चेति चतुर्दशाङ्गु-(लका ? ला)देरविशेषप्रसिद्धाः संज्ञाः । द्विवितस्तिररत्निः प्राजापत्यो हस्तः लोकसंव्यवहारार्थः ॥

स एव सधनुर्ग्रहः अष्टाविंशत्यङ्गुलः पौतवविवीतमानम् । तद्यथा—"काष्ठतुलामष्टहस्तां पदवतीम्" इत्यादि । पौतवविवीतमानम् इत्युपलक्षणार्थत्वाद् ब्रह्मसोमादिग्रहणम् , तत्र हि गव्यूताद्यनेन मानेनेति । सधनुर्मुष्टिः प्रजापत्य एव द्वात्रिंशदङ्गुलः किष्कुः कंसो वा ॥

द्विचत्वारिंशदङ्गुल इति । चतुर्दशाङ्गुलाधिकः तक्ष्णो हस्तः क्रकर एव किष्कुः सारदारुपाटनार्थः । अपरे क्राकचिककिष्कुरित्य-न्वर्थमेव पठन्ति । स एव क्राकचिककिष्कुः स्कन्धावारस्य दुर्गस्य राजपरिग्रहस्य राजविशेषस्य मानम् । चतुष्पञ्चाशदङ्गुलः कुप्यवनहस्तः कुप्यवनसमुत्थद्रव्यमानार्थः ॥

(चतुरशीत्यङ्गुलो) व्यामो रज्जुमानं (सम्भवः?)खातपौरुषं(च) ।

चतुररत्निर्दण्डो धनुश्च संज्ञाद्वैधम्[2] । नालिका पौरुषं च नालिकाकारेति ज्ञायते ॥

M. 107. गार्हपत्यमष्टशताङ्गुलं धनुः गृहपतीनां वास्तुमानार्थम् । धनुः वितस्त्यधिकमित्यर्थः । तदेव पथिमानं प्राकारस्य च ॥

पौरुषं च अग्निचित्यानामिति गार्हपत्यं धनुः पौरुषाधिकं यज्ञवाटादि-मानं धर्मार्थत्वाद् अधिको दण्डोऽर(ण्य ?त्न्या) इत्यर्थः[3] ॥

---

1. केशवस्वामी तु "शमस्तु माने च चतुरङ्गुले, पदं पञ्चदशाङ्गुले" इत्याह ।

2. "दण्डादयश्चतस्रः संज्ञाः" इति भट्टस्वामी ।

3. अग्निचित्यानां धनुः अष्टशताङ्गुलाद् गार्हपत्यधनुषः पौरुषाधिकं वितस्त्यधिकं विंशत्यधिकशताङ्गुलमित्यर्थः । इदं च "पञ्चारत्निः पुरुष इति शुल्बविदः" इति पदमञ्जरीग्रन्थेन संगतार्थं भवति (V. I. 24) ।

T. 265. **षट्कंसो दण्डो ब्रह्मदेयातिथ्यमानं** ब्रह्मदेया(नाम)तिथीनां चागन्तॄणां यद्देयं तस्य मानम् । **दशदण्डा** (यज्ञ ? रज्जु):, भूमिमानम् । तथा **परिवेशो निवर्तनं**[1] चोभयं भूमिमानम् ॥

एकतो द्व्यधिको भागो **बाहु**रित्युच्यते । नैर्मुख्यमिति परिवेशन-निवर्तने उभे चतुरश्रे एकवद् द्विदण्डाधिक्याद् व्यञ्जनस्थानीये भवतः । **गोरुतं योजनं** च प्राजापत्यमानेनैव बोद्धव्यम् ॥

कालमानमत ऊर्ध्वम्, वक्ष्यतीति शेषः । **त्रुटो लव** इति । अत्र त्रुटादयस्तावद् अवयविद्रव्यविषयाः साहचर्याद् अवयवस्यापि कालस्याभेदम् (आ ? औ)प(चत्वा ? चा)रिकं (कल्प्यच्छेषका?) । अपरे त्वाहुः—क्रियैव ज्ञातपरिमाणा क्रियान्तरस्य परिमाणं कल्पयति कालम् । तद्यथा—गोदोहं स्वपितीति ॥

द्वौ त्रुटौ लव इति । तत्र त्रुट इति ह्रस्वाक्षरचतुर्भागग्रहणम्, लव इत्यर्धह्रस्वम्, निमेषो ह्रस्वमात्रम् । यथोक्तम्—लघ्वक्षरोच्चारणं निमिष इति । **नालिके**ति छायानालिकाप्रमाणेनैव ग्राह्या ॥

T. 266. अपरोऽपि, **सुवर्णमाषाश्च चत्वारः चतुरङ्गुलमायती-कृताः** । त एव कुम्भच्छिद्रकारणत्वात् कुम्भच्छिद्रस्रावणत्वाद् (आढकम्) **अम्भस** इति स्रुतिपरिसमाप्तौ **नालिके**त्युच्यते गौण्या वृत्त्या । अयं तु वाक्यार्थः—सुवर्णमाषतश्चतुष्टयेन चतुरङ्गुलायतेन निश्छिद्रात् कुम्भाद् यावता कालेन स्रवेद् आढकमम्भः, तावान् कालो नालिकेति[2] ॥

उक्तं च—

सुवर्णमाषकाश्चत्वारः कृतिताश्चतुरङ्गुलाः । (माषकचतुरङ्गुला ?) तत्प्रमाणकच्छिद्रा(दा)ढका(म्भो)विनिर्गमे नालिकेति साख्याता, (च्छायाभावे घनं पुनरर्धामलकवच्छ्लक्ष्णं समं ताम्रं च कारं चेति ?) ॥

1, रज्जुत्रयप्रमाणं स्यात् क्लीबलिङ्गं निवर्तनम्, इति केशवस्वामी ।

2. "नालिकादिभिरिति, उक्तं हि—सुवर्णमाषकाश्चत्वारः चतुरङ्गुलायामाः, तत्प्रमाणकुम्भच्छिद्रेण जलाढकस्य यावता कालेन स्रुतिः स कालो नालिकेति," इति कामन्दकीयजयमङ्गला (V. 52.) ।

M. 108. (द्विनालिको मुहूर्तः) । प(ञ्चाशन्? ञ्चदशमु)हूर्तौ दिवसो रात्रिश्च चैत्रे (मासा? मेषा)दौ, आश्वयुजे च तुलादौ विषुवदारम्भे भवतः, न सर्वदा । ततस्त्रिभिर्मुहूर्तैरन्यतर इति दिवसो रात्रिर्वा । ततश्चैत्रात् परं प्रत्यहं मुहूर्तत्रिंशद्भागसञ्चारेण प्रतिमासदिवसानां वैशाखे षोडश मुहूर्ताः, सप्तदश ज्येष्ठे, अष्टादशाषाढे । एवमाश्वयुजे पञ्चदशमुहूर्तो दिवसः । ततः परं प्रतिमासं मुहूर्तहान्या कार्त्तिके चतुर्दश मुहूर्ताः, (सा?) मार्गशीर्षे त्रयोदश, पौषे द्वादश मुहूर्ता इति दिवसवृद्धिह्रासक्रमेण च अहोरात्रे ह्रासो वृद्धिश्च ॥

यद्येवं षण्मासं वर्धते ह्रसते चेति कथमेतद् भवति । द्वादशमुहूर्ताद् (वि?) पौषादिवसात् प्रभृति वृद्ध्या चैत्रे समत्वम्, आषाढं यावद्दिवसानां वृद्धिप्रकर्षादुत्तरायणे षण्मासं वर्धते । तथा अष्टादशमुहूर्ताद् आषाढादिदिवसात् प्रभृति हान्या आश्वयुजे मासे समत्वं पौषं यावद्दिवसानां ह्रासप्रकर्षाद् दक्षिणायने षण्मासं ह्रसत इति वृद्धिह्रासा-वाकलय्य नालिकां च वा, अहोऽष्टधा रात्रिं च विभजेद् राज-प्रसिद्ध्यर्थम् ॥

अथ छायया कथमष्टधा विभागः कार्य इत्यत्राह—**छायायामष्ट-पौरुष्यामिति** । पौरुषं वितस्तिरित्युक्तम् । षण्णवत्यङ्गुलायां **अष्टादशभागश्छेदः** दिवसस्य, सप्तदशभागाश्चावशिष्टा भवन्ति । **चतुर्दशभाग** इति दिवसस्य चतुर्दश भागाः कल्पनीयाः । तत्र चतुर्दशो भागश्छिन्नः, त्रयोदशावशिष्टाः । [1]दशभागश्छेदः नव भागा अवशिष्टाः । **षड्भागश्छेदः** पञ्चावशिष्टाः । **चतुर्भागश्छेदः** द्वावष्टभा(गावा? गौ) छिन्नौ षड् भागाः शेषमित्यर्थः ॥

T. 267. **त्रयो दशभागा** इति दशधा विभक्तस्य दिवसस्य दशभागास्त्रयश्छिन्नाः सप्त शेषा इत्यर्थः । **त्रयोऽष्टभागा** इति पञ्चावशिष्टाः । **अच्छायो मध्याह्न** इति । तत्र चत्वारोऽष्टभागा उक्ताः ॥

परिवृत्ते अहर्मध्यदिवसे, **शेषम्** अनेन क्रमेण **विद्यात्** । यथा भोगस्तथा अपराह्णे शेषम् । तद्यथा—चतुरङ्गुलायां त्रयोऽष्टभागाः शेषाः, दश भागास्त्रयोऽष्टाङ्गुलायाम्, पौरुष्यां चतुर्भागः, यावन्नष्टच्छायो दिवसान्त इति योज्यम् । एवं रात्रावपि नालिकया छायाविभागोऽप्यूह्यः ॥

---

1. अष्टभाग इति मुद्रितमूलकोशेषु ।

अयं च नष्टच्छायो मध्याह्न आषाढे मासि भवति । **ततः परं श्रावणो (द्व्य)ङ्गुलच्छायः** । प्रोष्ठपदश्चतुरङ्गुलच्छायः । एवं प्रतिमासं द्व्यङ्गुलवृद्ध्या पौषे पौरुषी छाया । ततो माघादीनां द्व्यङ्गुलहान्या आषाढो नष्टच्छाय इति भागभोगास्त्वन्ये पूर्ववदेव ॥

एवं त्रिंशन्मुहूर्तमहोरात्रम् । **पञ्चदशाहोरात्राः पक्षः** । स च द्विविधः—**सोमाप्यायनः** प्रवर्धमानसोमः **शुक्लः** । **सोमच्छेदनो** हीयमान-सोमो **बहुल** इति ॥

T. 268. **प्रकममास** इति । अध्यक्षाणां कर्मारम्भमासः । **सार्धः सौर** इति । द्वौ पक्षौ (अर्धपक्षश्च?) **सौरो** मासः । **अर्धन्यूनश्चान्द्रः** । (अर्धत्रयो-विंशतिदिवसः ?) **मलमासः** सेनाविक्षेपभक्तदानार्थः । **अश्ववाहायाः** अश्ववाहनि-मित्ताया दिनादिकल्पनायाः । एवं **हस्तिवाहायाः** ॥

M. 109. **द्वौ मासावृतुः** । ते च ऋतवो वर्षाद्या आ आषा(ढ ? ढात्) । तत्रापि न सर्वेष्वृतुषु अधिमासका जायन्ते, किन्तु ग्रीष्मे हेमन्ते च भवन्ति ॥

T. 269. **शिशिरादि** ऋतुत्रयम **उत्तरायणम्**, आदित्य उत्तरवीथीमयति, **वर्षादि** ऋतुत्रयं **दक्षिणायनम्**, दक्षिणवीथीमयति । **द्व्ययनः संवत्सरः** । **पञ्चसंवत्सरं युगमिति** संव्यव(हार्थम्) । चतुर्युगं मन्वन्तराद्यवरं राजवृत्तावसंव्यव-हार्यत्वान्नाख्यातम् । न ह्येतात्र(त् ? न्तं) कालं कस्यचिद्राज्ञः त(त्रा ? न्त्रेऽ)-वगतो व्यवहार इति ॥

दिवसस्य हरत्यर्क इति । अत्रापि काले दिवसस्येत्यहोरात्रग्रहणम् । तस्य हरत्यर्को गतिविशेषात् **षष्टिभागं** नालिका द्विनालिको मुहूर्तः, त्रिंशन्मुहूर्त-महोरात्रमिति । तत्र **करोत्येकमहश्छेदम्** । **तथैवैकं (च)चन्द्रमाः** । तथा चोक्तम् —"वर्षाहेमन्तग्रीष्माणां तृतीयसप्तमा दिवसोनाः शेषाः पूर्णाः" इति । (अधि० २. अध्या० ६.) ।

यदुक्तम्—"पृथगधिमासकः" इति तदर्थमाह—**एवमर्धतृती-यानामिति** । एवमनेन प्रकारेण सूर्याचन्द्रमसौ गति(गति ?)हान्या दिवसमृतौ वर्धयतः । अर्धतृतीयानाम् अब्दानाम् एव । (ते ?) "अधिमासं करणाधिष्ठितं (यत् ?) कुर्याद्" इत्युक्तम्, अयमेषां त्रयोदशमासः संवत्सरः, त्रिमासश्चायमृतुरिति ज्ञापनार्थम् । तद्दर्शयति—**ग्रीष्मे जनयत** इति । पञ्चभिः

संवत्सरैः अधि(क?)मासद्वयं भवति । तत्र पूर्वाब्दाः पश्चार्धाब्दाश्च अर्धतृतीयाः । तत्र पूर्वाब्देषु अर्धतृतीयेषु आषाढे मासि सूर्याचन्द्रमसौ पूर्वं प्रथममधिमासकं जनयतः । पश्चिमानामर्धतृतीयानामब्दानां यः (पक्षो? पौषो) मासो हैमन्तः, तस्मिन् पश्चिममिति । पञ्चाब्दान्त इति पाठान्तरम् । पञ्चानाम् अब्दानामन्ते पूर्वार्धतृतीयाब्दापेक्षयोच्यते, युगस्यान्त इत्यर्थः । पूर्वमर्धयुग एव जनयतः, पश्चिमं तु युगान्त इति । तेन युगस्यैव पूर्वपश्चिमभागापेक्षया पूर्वपश्चिमत्वं व्याख्येयमिति ॥

॥ इति देशकालमानं विंशतितमं प्रकरणं समाप्तम् ॥

॥ विंशतितमश्चाध्यायः ॥

॥ अथ एकविंशोऽध्यायः ॥

T. 270. इदानीं संव्यवहारो दानग्रहणादिर्वाच्यः, स च पण्यप्रवेशात् प्रभृत्येवेति शुल्काध्यक्षव्यवहार एव तावदध्यायद्वयेनोच्यते ॥

शुल्काध्यक्ष इति समाहर्तृप्रयुक्तः (शुल्कशालां) **ध्वजं च प्राङ्मुखमभिज्ञानार्थम्** । किं पुनर्ध्वजस्य मुखं येन प्राङ्मुख(मुदङ्मुख)मित्युभयं सम्बध्यते । शालाध्वजस्य तत्सम्बन्धान्नगरस्य यानि मार्गद्वाराणि तदभ्याशे ततः किञ्चिन्निगद्यते । पूर्वपश्चिममा(या? र्गा)भिमुख्यार्थम् उदग्द्वारम्, दक्षिणोत्तरमार्गाभिमुख्यार्थं प्राग्द्वारम् ॥

M. 110. **शुल्कादायिन** इति शुल्कादानशीलाः अध्यक्षपुरुषाः । **चत्वारः पञ्च वा** इति । एकेन लिख्यमाने कालातिपातव्यामिश्रदोषाभ्यां सार्थस्यार्थघातः स्यात् । तस्माद् बहवो यौगपद्येन व(ध? र्ग)शो विभज्य सार्थाभ्यागतान् **वणिजो लिखेयुः—के** किंनामानः, **कुत** आगताः, **कियत्पण्याः** कियत्परिमाणं पण्यम् (अस्य? एषाम्) इति । **क्व** चास्मिश्च अन्तपालाभिज्ञानमुद्रा युष्माकं राष्ट्रप्रवेशे कृतेति ॥

अमुद्राणाम् अन्तपालं वञ्चयित्वा आगतानां तैः **यद्देयं** वक्ष्यमाणं **तद्द्विगुणो** दण्डः ॥

कूटमुद्राणामिति अन्तपालसदृशीं मुद्रां कृत्वा मुद्रितवतां **शुल्कद्वयं देयम्, तत् सङ्गृह्यते** । ततोऽष्टगुणोऽस्मात् साहसदण्डः ॥

भिन्नमुद्राणां तु प्रमादाद् अयमेवात्ययः, यद् घटिकास्थाने[1] स्थानम् असंव्यवहारता यावदन्तपालाभिज्ञानं पुनरागतमिति ॥

T. 271. मुद्रापरिवर्तन इति अन्यस्य भाण्डे मुद्रिते तेन प्रतिमुद्रां कृत्वा स्वभाण्डमुद्रणे । सपादपणिकं वहनं पत्रं दापयेत् । कथं पुनः शुल्काध्यक्षेण मुद्रापरिवर्तनं ज्ञायत इति चेत्, नामकृते परिवर्तने ज्ञाते इत्यन्तं ज्ञापयति अन्तपालोऽपि नामादिलेख्यमस्मै स्वपुरुषेण प्रेषयतीति । तत्र लेखेन इदमस्य लिखितम्, मुद्रितं च भाण्डम्, ध्रुवं तेन मुद्रा परिवर्तितेति ॥

ध्वजमूलावस्थितस्येति । पण्यस्य इदं प्रमाणम्, इयता चार्घेण तत्र क्रीतमिति वैदेहकाः पण्यस्वामिनः कथयेयुः । अथवा वास्तव्यवणिजः पण्यप्रमाणमित्यमूल्यं चाध्यक्षाय कथयेयुः । ततः पण्यस्वाम्येव एतेनार्घेण इयत्प्रमाणं पण्यमिदम्, कः क्रेतेति शुल्कपरिशुद्धिज्ञापनार्थं (दूरा ? त्रिरु)द्-घोषयेत् । ततः परिशुद्धत्वाद् दद्यात् ॥

क्रेतृसंघर्षे[2] इति । यदा क्रेतॄणामर्थित्वे संहर्षान्मूल्यवृद्धिः स्यात्, तदा मूल्यकृते यच्छुल्कमुचितम्, यावती मूल्यस्य वृद्धिः, तदुभयं राज्ञः कोशं गच्छेत् । अन्यथा परस्परोद्वर्तनेन क्रयं कुर्वाणा(: ? त्) पण्येश्वराद् अन्यः पण्यं नैकमप्याप्नुयात् ॥

शुल्कभयादिति पण्यभागे मूल्ये वा शताद् भयात् पण्यस्य प्रमाणं मूल्यं वा हीनं कथयतः सार्थिकस्य तत् पण्यं मूल्यं वा अतिरिक्तं व्यवहारेषु उपलभ्य राजा हरेदिति नियोगात् शुल्काध्यक्ष एवोच्यते । शुल्कमष्टगुणं वेति प्राक् शुल्कं दत्वा सप्तभागानपरानधिकान् दद्यात् । किञ्च, जानन्नेव प्रकरणाद्धलीयानिति सार्थिको दद्यात् । तदेव शुल्क(मष्टगु)णं दद्यादित्यर्थः ॥

तदेव निविष्टपण्यस्येति प्रविष्टस्य पण्यस्य हीनप्रतिवर्णकेनार्घा-पकर्षणे । पण्यमूल्यं शुल्कं गृह्णात्यध्यक्ष इति बुद्ध्वा पण्यस्य हीनं प्रतिवर्णकं दर्शयित्वा शुल्कार्थमर्घापकर्षणं यः करोति, तदेव तस्य शुल्काष्टगुणं

1. अत्र घटिकास्थानमिति शुल्कशालोच्यते । अनन्तशयनप्रकाशितायां कौटलीयव्याख्यायां घटिकाशब्दस्य नाडिकात्मककालवाचित्वोक्तिर्नोपपन्ना ।

2. 'संहर्षः स्पर्धायां च,' इति मेदिनी, संघर्ष इति मुद्रितकोशपाठः ।

दण्डम्, **सारभाण्डस्य** कुङ्कुमादेः **फल्गुभाण्डेन** ऊर्णादिना **प्रच्छादने च** तदेवाष्टगुणग्रहणं कुर्यात् ॥

प्रतिक्रेतृभयाद्वेति। प्रतिपक्षात् क्रेतुर्भयाद्वा—कथमयं न क्रीणीयाद् इति द्वेषेण **पण्यमूल्याद्** उचिताद् उपरि तृतीयं चतुर्थं वा भागमूल्यम् आरोपयतः **मूल्यवृद्धिम्**, (ततोऽन्ये तापसा व्यवहारे ज्ञातमर्घकारिणः?)[1] **राजा हरेत्**। **द्विगुणं वा शुल्कं कुर्यात्** ॥

T. 272. **तदेवाष्टगुणमध्यक्षस्य छादयत इति**। तदेव शुल्काष्टगुणम् अध्यक्षस्यापि वणिक्संवृतस्य छादयतः, फल्गुना(मा? म्ना) सारमिति, अर्थादवच्छादयतः साराष्टगुणमध्यक्षस्य तदेवाधिकं दण्डं कुर्यात् ॥

तस्माद् (देयज्ञाति? एतज्जातीय)कदोषपरिहारार्थम्, **विक्रयः पण्यानां** निसृष्टानां धारणार्हाणां **धृतः**, मानार्हाणां **मितः**, गणनार्हाणां **गणितः कार्यः**, न तु तर्केणैवेति। अस्यैव अपवादस्तर्कः **फल्गुभाण्डानां** पुष्पफलानाम् अ(नु)ज्ञेयः। **आनुग्रहिकाणां** यत्र दुर्लभानि तत्र वणिजामनुग्रहार्थं तेषां तर्केणापि विक्रयोऽनुज्ञातव्यः ॥

ध्वजमूलमतिक्रान्तानामहृतशुल्कानाम् अकृतमूल्यानां **शुल्काष्टगुणो दण्डः**। M. 111. कथं पुनस्तद्विद्यादिति, **पथिकोत्पथिकास्तद् विद्युः**। महापथक्षुद्रपथरक्षिणः शुल्काध्यक्षपुरुषास्तदतिक्रमं विद्युः। अथवा पथिकास्तेन पथा गन्तारोऽन्ये (द्र?प्र)ष्टव्याः, उत्पथिकाश्चारण्यनिवासिनो व्याधादयः ॥

वैवाहिकमिति पौरजानपदानां विवाहनिमित्तम्। वैवाहिकक्रियाया गच्छन्त्या वा सुवासिन्या यत् प्रविष्ट(क)तः प्रदेयं नीयते तद् **अन्वायतम्**। उपायननिमित्तम् **औपायनिकम्**। **उच्छुल्कं गच्छेत्** प्रविशेन्निष्क्रामेच्च। तथा **यज्ञकृत्य**निमित्तम् उत्स(व)निमित्तमित्यर्थः। **प्रसवनिमित्तमुपकरणमिति** तदुत्पाताद्युपशमाय शान्तिवचनादि तन्निमित्तं **भाण्डम्**। **देवेज्या** देवपूजा। **(चौलं)** चूडाकरणम्। **उपनयनं** वटूकरणम्। **गोदानं** व्रतपरिसमाप्तिः। उपनीतस्य सतः प्रतिवर्षं यद् **व्रतम्** आदिश्यते। आदिग्रहणात् पुंसवनाद्युपग्रहः। एतेषु **क्रियाविशेषेषु** भाण्डमुच्छुल्कं गच्छेत् ॥

T. 273. **अन्यथावादिन** इति अतन्निमित्तस्य विवाहादिनिमित्ततां व्यपदिशतः मिथ्यावादिनः शुल्कस्तेनस्येव पूर्वोक्ता(द)न्यदण्डः ॥

---

1. ततोऽन्यदपि तापसव्यञ्जनाद् अर्घहारिणः इति पाठः स्यात्।

कृतशुल्केन भाण्डेन मिश्रीकृत्य **अकृतशुल्कम्** अमुद्रितमेव कचिन्मुद्रां दर्शयित्वा **निर्वाहयतः** एकत्वादिवाचा अस्यान्तः प्रवेश्य **द्वितीयमपि पुटमपहारयतो वैदेहकस्य** तस्य शुल्कग्राह्यं यद् धृतं **तावच्च** अन्यच्च (दण्ड्यमिति किं तत्र?) **दण्डः** ॥

शस्त्रवर्मेति शस्त्रादीनां (प्रधानम्?) अन्यत्र(मते तु?)अनिर्वाह्यत्वेऽवघोषिते निर्वहणकर्म(णि) **यथावघोषित** एव विनानुग्रहेण **दण्डः** कार्यः । **पण्यस्य चास्योच्छेदनम्** ॥

तेषामेव शस्त्रादीनाम् **अन्यतो**[1] **देशाद्** **दुर्लभानाम्** **आनयने बहिरेव** जानपदानाम् उत्सृष्टशुल्कोऽनुग्रहार्थं **विक्रयः** । अन्यथा अभ्यन्तर-प्रवेशे सति पुनरन्ये....भावान्न गृह्णन्ति जानपदा (इति) मत्वा देशान्त-(रं? रान्)नयन्ति वा देशान्तरामिति ॥

T. 274. **अन्तपालः सपादपणिकां वर्तनीं गृह्णीयादिति** । वर्तनीति तत्प्रभवत्वाद् आयस्यापि व्यपदेशः । एकस्य पण्यवहनदेशे एकैकस्य, न तु पुटभेदनं कृत्वा द्रव्यं कल्पयेत् । सपादपणिकाम् इत्यस्यापवादः **पणिका-मेकखुरस्य** गर्दभा(दीनामिति) । महिषस्य **अर्धपणिकाम्** । **पादिकां क्षुद्रवर्गा-णाम**जैडकादीनाम् । **अंसहारकस्य माषिकां** गृह्णीयादिति । **नष्टापहृतं चेति** शालायां गोप्रचारे वा नष्टं गवादि, चोरैर्हृतं (च) **प्रतिविदध्याद्** अन्वेषणेन ॥

वैदेशमिति विदेशादागतं वैदेशं **सार्थम्** आगतं विविच्य यत् फल्गु यत् सारम् इति **कृतसारफल्गुभाण्ड** एव वा तयोश्च **अभिज्ञानं** लिखित्वा **मुद्रां च** मुद्रासङ्क्रान्तां कूटमुद्राभिज्ञानार्थं **प्रेषयेद्** अन्तपालः **शुल्काध्यक्षस्य** ॥

वैदेहकव्यञ्जनो वा समानकर्मतया सार्थमात्रप्रवृत्तः **सार्थप्रमाणं** सारतः सङ्ख्यातश्च स्वान्तेवासिभिः **राज्ञः** संपादयेत् । (तेन) **प्रदेशेन** वैदेहक-व्यञ्जनोपदेशेन **राजा शुल्काध्यक्षस्य** सार्थिकसमर्थं **सार्थप्रमाणमपदिशेत्**, एवंविधोऽयं सार्थ इति **सर्वज्ञत्वख्यापनार्थम्** । ततः **सार्थमध्यक्षोऽधिगम्य ब्रूयात्**—M. 112. **इदं** कर्पूरादि, **अमुष्य** यक्षसेनस्य **सारभाण्डम्** । **फल्गुभाण्डं च** इदम । तस्माद् अतोऽन्यदपि **न निगूहितव्यम्** । **एष राज्ञः प्रभावः** यत् परोक्षमपि जानाति (इति) ॥

---

1. अन्यतमस्येति पाठो नूनं प्रामादिको मूलकोशेषु मुद्रितेषु ।

T. 275. विनिगूहतः फल्गुभाण्डमित्यादि स्पष्टम् ॥

राष्ट्रपीडाकरमिति यत् प्रवेशितं भाण्डम् अर्धेन राष्ट्रं पीडयति, तद् उच्छिन्द्यात् गतागतविच्छेदेन । यद् वा, अफलम् सुलभत्वात् तदप्युच्छिन्द्यात् । महोपकारं राष्ट्रोपकारं तदशुल्कं कुर्यात् । बीजं च यस्मिन् देशे दुर्लभं तदानयतामुपकारायेति ॥

॥ इति शुल्काध्यक्षः एकविंशं प्रकरणम् ॥
॥ एकविंशश्चाध्यायः ॥

॥ अथ द्वाविंशोऽध्यायः ॥

T. 276. शुल्काध्यक्षप्रकरणे रक्षा व्याख्याता । इदानीं शुल्कव्यापार उच्यते शुल्कव्यवहार इति । शुल्कव्यवहार इत्यधिक्रियते ॥

बाह्यं राष्ट्रजम्, आभ्यन्तरम् (दूरा? दुर्गा)र्थम्, आतिथ्यं देशान्तरादागतमिति । द्विविधम् निष्क्राम्यम्—दुर्गाद् राष्ट्रं राष्ट्राद् देशान्तरं वा । प्रवेश्यमपि देशान्तराद् राष्ट्रम्, राष्ट्राद् दुर्गं च शुल्कम् ॥

तत्र प्रवेश्यानां मूल्यं कृत्वा पण्यानां मध्यमोत्तराधमानां मूल्यपञ्चभागं वणिग्भ्यो गृह्णीयात् । अयमुत्सर्गः ॥

पुष्पादीनां तु उद(कमर्थ ? कार्ध)व्यवहाराणां तद(र्थं?) गृह्णीयात् । तत्र वल्याः फलानि वल्लिक्यानि कूश्माण्डकादीनि ॥

शङ्खादीनां हारावसानानां न मिथो मूल्यं कुर्यात् । किं तर्हि, तज्जातपुरुषैः कारयेत् । तेषां विशेषमाह—कर्म यैरेवं कृतम्, प्रमाणैः ज्ञातकालैः, ज्ञातवेतनैः, ज्ञातफलनिष्पत्तिभिरिति ॥

क्षौमादीनां दशभागः पञ्चदशभागो वा । तत्र तत्सूत्रं क्षौमादिषु प्रत्येकमभिसम्बध्यते क्षौमदुकूलसूत्रस्य य(स्त्र ? स्ता)यस्तस्येति । कङ्कटः । सूत्रोतस्तु (आ)वरणविशेषः । लोहं सुवर्णादि, वर्णधातुः गैरिकादिः ॥

T. 277. कटुकग्रहणेन कटुकवर्गो गृह्यते जीरकादिः । किण्वावराणामिति किण्वमवरं येषामुत्कृष्टा(दी?)नां विशिष्टा(दी?)नाम् । क्षौमग्रहणं निकरविशेषणम् । निकरं वस्त्रं निकराणामित्यपृथग्भूतानाम् । दुकूलवस्त्रम् । कृमिजं कौशेयम् । अजानामेडकानां च मूल्यदशभागः । पञ्चदशभागो देशकालापेक्षया ग्रहीतव्यः ॥

M. 113. **वस्त्रचतुष्पदेति** । **वस्त्रम्** । कार्पासिकं **सूत्रम्** । **कार्पासं** केवलमेव । गन्धस्तगरादि । **भैषज्यं** शृङ्गबेरादि । **चर्म** गोचर्मादि । पूर्वमजिनं[1] मूषिकोद्भवं ज्ञेयम् । आदिग्रहणात् एवंजातीयकानां शय्यासनादीनां ग्रहणम् । **पक्वान्न**मोदनम् । (ओद)नादपू(र्वका ? पा)द्युपग्रहः । एषां मूल्यस्य **विंशतिभागः पञ्चविंशतिभागो वा** ॥

द्वारदेयमिति पण्यशुल्कं दत्त्वा नगरस्य निष्क्रासप्रवेशयोरपरं द्वारदेयम् । किं तत्, शुल्कस्य यः **पञ्चमो भागः** । **आनुग्राहिकं** वेति अनुग्रहः प्रयोजनं यस्य शुल्कस्य तदानुग्राहिकम् । **यथादेशोपकारं स्थापयेत्** । एतद्देशानां द्वाशभाग इति । देशग्रहण(त्वाद्‌ ? मु)पलक्षणम्, ब्राह्मणानामयमनुग्रहः, अयं क्षत्रियाणाम्, अयं सङ्घस्येति ॥

जातिभूमिषु चेति पण्य(भूमि?)जन्मभूमिषु लाभाभावात् **पण्याना-मविक्रयः** । तत्र ह्यविदितो विक्रयः शुल्कम् (अप)वाहयेत् स प्रतिषेद्धव्यः ॥

कथमित्याह—**खनिभ्य** इति खनिभ्यो धातुपण्यानां वज्राणाम् **आदाने क्रेतुः** स्वयंगामित्वात् **षट्छत**मत्ययः । विक्रेतुस्तेनोक्तम् ॥

T· 278. **पुष्पफलवाटेभ्य**स्त्वारामेभ्यः **पुष्पफलादाने क्रेतुः चतुष्पञ्चाशत्पणः** ॥

षण्डेभ्यः (कोचरीकारिकृतेभ्यः?) **पादोनः** काकणीन्यूनः **द्विपञ्चा-शत्पणः** ॥

सीतात्यय इति । यः सीतायां खले क्रीणाति सस्यं सामान्येन तस्य **त्रिपञ्चाशत्पणः** । सीता(त्यय)श्च **पणार्धपणश्च** सीतात्ययः । अन्यस्त्वाह —सामान्येन सर्वसस्यादाने त्रिपञ्चशत् । पणार्धपणश्च सीतात्ययः पणमूल्ये सस्येऽर्धपणः क्षेत्रगतस्यादानेऽत्ययः ॥

अतो नवपुराणानामिति । शुल्कं द्वारदेयं नियमार्थम् । एवं नवस्य एवं पुराणस्य वा शुल्कमिति । (एवमितमेकं ?)निर्देश्यानां पञ्चालानामिदम्, ब्राह्मणानामिदम्, परिभाषापेक्षमिति । **पण्यानां शुल्कमत्ययं च अपरा(धतः)** अल्पतापेक्षया अल्पम्, महत्तया महान्तमिति ॥

॥ इति शुल्काध्यक्षः द्वाविंशतितमं प्रकरणं समाप्तम् ॥

॥ द्वाविंशतितमश्चाध्यायः ॥

---

1. दन्ताजिनेति पूर्ववाक्ये पठितमित्यर्थः

॥ अथ त्रयोविंशोऽध्यायः ॥

T. 279. क्षौमदुकूलादीनां दशभागः शुल्कमित्युक्तम् । तानि पुनः क्षौमदुकूलादीनि कथं कार्याणीति सूत्राध्यक्ष(ः?स्य) पुरे, सन्निधातुः राष्ट्रे च **कर्माह सूत्राध्यक्ष** (इति) । स्वव्यापारविधानार्थं प्रक्रियते सूत्राध्यक्ष इति । (सः) **सूत्राणां रज्जूनां** च (व ? क)र्तन[1]वानव्यवहारांस्तज्जातपुरुषैरध्येतृभिः **कारयेत्** ॥

ऊर्णादीनि कारयेदित्येव । अथवा कर्तयेदिति वक्ष्यमाणेन सम्बन्धः । तत्र **तूलं** शाल्मल्यादीनाम् । (विकलाः पतिता ?)[2] । न्यङ्गा(नि ? न) येनाङ्गेन विना शक्नुवन्ति कर्तितुं तेन(न) विकलाः । **कन्यका** दरिद्रदुहितरः । **दण्डप्रतिकारिण्यः** दण्डं दातुमशक्ता याः, ताः (किंन ? कर्मणा) प्रतिकुर्युः । **रूपाजीवामातरो** वेश्यामातृकाः । **वृद्धराजदास्यः** अन्यकर्मायोग्यत्वात् । **व्युपरतोपस्थानाः देवदास्यः** देवस्य कामुकस्य वा उपस्थानासमर्थत्वात् । ताभिः **कर्तयेत्** ॥

M. 114. **श्लक्ष्णस्थूलमध्यतां सूत्रस्य ज्ञात्वा वेतनम्** उत्तमाधममध्यमं **कल्पयेत्** । **बहुल्पतां** चेति सूत्रस्य बहुत्वे सति **तैलादिभिरनुगृह्णीयात्** मू(ल्य)वधार्थम् अल्पत्वेनैवेति, (अथोक्तमिति किञ्चिदिति?) ॥

(तिथिषु) पुष्यफल्गुन्यादिषु **पुष्पादिप्रतिमाननैः** भक्ष्यभोज्यपानदानै-श्चोपायैः **कर्म** सोत्साहं **कारयितव्याः** ॥

सूत्रह्रासे वेतनह्रासो द्रव्यसारात् का(र्पा)सपञ्चपलं सूत्रपलं भवति[3] । यदा तर्कितस्य सूत्रस्य ह्रासो भवति तदा तस्मिन् ह्रासे यद्दीयते वेतनं ताभ्यः, तत् कुर्यात् । द्रव्यसारापेक्षया द्रव्यसारान्मूल्यं कृत्वेत्यर्थः ॥

T. 280. कुतोऽन्यद्दाप्यतामिति तच्च मूल्यकैः कारयेदित्याह— **कृतस्य कर्मणः** इयत् प्रमाणं सूक्ष्मं चेदल्पमपि भवेत्, **कालश्च** महानपि स्यात्, **वेतनं च** प्रभूतम्, इयती **फलनिष्पत्तिः**, इति मूल्यमप्यस्य प्रभूतमेव । तज्ज्ञैः **कारयेत्** ॥

इदानीं वानार्थमाह—**कारुभिः** तूल(क?)कौशेयादिभिः **सूक्ष्मकर्मकारिभिः प्रतिसंसृज्येत** । ततः किमिति चेदाह—**क्षौमदुकूलेति** । **तानं** सूत्रमुच्यते

---

1. 'कर्तनं तु क्ली छेदने सूत्रसर्जने' इति केशवस्वामी ।
2. विधवा विपतिका इति पाठः स्यात् ।
3. "कार्पासक्षौमाणां पञ्चपले पलसूत्रम्", इति कोष्ठागाराध्यक्षे कौटल्यः (II. 15.) ।

प्रत्येकश्चापि । क्षौमदुकूलक्रिमिसूत्रवानकर्मान्ता(न्) । राङ्कवं [1]रङ्कुदेशभवं पट्टसूत्रं[2] (तेनायं ? तानवम्) । राङ्कवसूत्रवानकर्मा(न्तः ? न्तान्) तथा कार्पाससूत्रवानकर्मा(न्तांश्च) । ……..दिभिः अन्यैश्चोपग्रहयोजनैः सुरादिभिराराधयेत् कारुशिल्पिनः ॥

तथा वस्त्रास्तरणप्रावरणविकल्पांश्च प्रसिद्धान् मुल्यवृद्ध्यर्थम्, उत्पादयेत् । तथा कङ्कटकर्मान्तांश्च स्थूलसूत्रेण । तज्जातैः कारुभिरन्यैश्च शिल्पिभिश्चिन्तकैः कारयेत् । ते च कङ्कटाः कूर्पासकाकृतयः पुरुषाणां रास्नादिभिः[3] खचिताः रथा हस्तीति ॥

या वा अनिष्कासिन्यः स्वगृहात् । कास्ताः प्रोषितपतिकाः विधवा वा, तथा न्यङ्गाः कन्यका वा आत्मानं परमाश्रित्य बिभृयुः, ताः स्वदासीभिरनुप्रविश्य विदिताभिप्रायाः सोपग्रहं कर्म कारयेत्, सूत्रस्येत्यधिकारात् ॥

निष्कासिनीनां स्वयमागच्छन्तीनां सूत्रशालां प्रति उपयापन-ज्ञानसम्पातो न भवति तावद् भाण्डस्य सूत्रस्य वेतनं कारयेत् । विनिमयश्च सूत्रस्य ग्रहणं कार्पासस्य दानमिति । यदात्वन्धकारः स्यात्तदा सूत्रपरीक्षामात्रः प्रदीपः दूरं नीत्वा सूत्रं परीक्ष्यं स्त्रियमपश्यतेत्यर्थः ॥

T. 281. करणमनुष्येण तु स्त्रिया मुखदर्शने सूत्रव्यवहाराच्च अन्यस्य कार्यस्य, कियन्तं कालं प्रोषितभर्तृका भवती, इत्यादेरपि सम्भाषायां पूर्वः साहसदण्डः । वेतनकालातिपातने मध्यमः । अकृतकर्मवेतनप्रदाने वा । कस्यायं दण्डः, यैस्तज्जातपुरुषैरध्यक्षः कर्म कारयेदिति ॥

M. 115. अङ्गुष्ठसन्दंशमिति अङ्गुष्ठाभ्यां सन्दंशं[4] दापयेत् कर्मप्रतिपत्त्येति । तथा भक्षितानां कार्पासादीनाम् अपहृतानाम् ।

---

1. देशवाचिनि कच्छादिगणे (IV. 2. 133.) रङ्कुशब्दः पठितः । रङ्कुर्नीवृद्देदे इति केशवस्वामी च ।

2. राङ्कवः कम्बल इति काशिका (IV. 2. 100.) ।

3. रशनादिभिरित्यर्थः ।

4. तर्जन्यङ्गुष्ठाग्राभ्यां सन्दंशम् अतीक्ष्णां व्यथां जनयेदित्यर्थः । "दक्षिणाङ्गुष्ठतन्मध्यमाङ्गुल्यग्रयोश्छेदः" इति अनन्तशयनमुद्रिता कौटलीय-व्याख्या अन्याय्या ।

अवस्कन्दितानां विनाशितानां (तैलमूषेत्कारादिना वामितितानां?)[1] । वेतनेषु प्रदत्तेषु । कर्मकराणामिति कर्तकानां वायकानां वा अपराधानुरूपो दण्डः ॥

रज्जुकर्मान्तानाह—रज्जुवर्तकैः कटकश्रृङ्खलाप्रतिबन्धार्थम् ।

चर्मकारैः कर्मकारैश्च वर्धक्यादिभिः काष्ठपाषाणादियोजनार्थं (सं)सृज्येत । भाण्डादीनि रज्जुविशेषान् कारयेद् वर्तयेदित्यर्थः ॥

T. 282. सूत्रवल्कमयीरिति सूत्रवल्कमयी रज्जूः कक्ष्याग्रैवेयाद्यर्थाः । वरत्राः चर्मवर्ध्रानिर्वृत्ताः । वैत्रवैणवीरिति[2] वेत्रं च वेणुश्चेति, "तस्येदम्" इति (वर्ण?अण्) । सान्नाह्याः सन्नाह्यन्ते आभिरिति सन्नहनादृताः । बन्धनीयाः बन्धनाय हिताः । यानस्य रथादेः । युग्यस्य र(था? थ्या)देः कारयेदिति ॥

॥ इति सूत्राध्यक्षः त्रयोविंशं प्रकरणं समाप्तम्

त्रयोविंशश्चाध्यायः ॥

॥ अथ चतुर्विंशोऽध्यायः ॥

T. 283. पूर्ववत् शुल्काध्यक्षापेक्षमेवेदं प्रकरणं सी(तल्यत्र-भिष्टोनतो? ताध्यक्षोपनीतं) कर्मेति सीताध्यक्षोऽभिधीयते । सीताध्यक्ष इति समाहर्त्रा प्रयुक्तः कृष्यध्यक्षः । कृषिशास्त्रं पाराशरम् । शुल्बशास्त्रं भूम्युदकस्वरूपरिज्ञानार्थम् । वृक्षायुर्वेदं च यो जानाति । यो वा तज्ज्ञैः सदा संसृज्यते । सर्वधान्यानां पूर्वापरमध्यमावापानाम् । पुष्पफलशाकमूलकन्दानाम् । वाल्लिक्यस्य कूश्माण्डकादेः । क्षौमकार्पासयोश्च बीजानि यथाकालं सङ्गृह्णीयात् ॥

ततो बीजानि बहुवारं परिकृष्टायां (मितं न?) कृष्टाया(ष्प?)मित्यर्थः । स्वभूमौ यद्बीजयोग्या या भूमिः तत्तस्याम् । दासकर्मकरदण्डप्रातिकर्तृभिर्वापयेत् ॥

---

1. 'तैलमूषिकोत्कर्तनादिना अवमर्दितानाम्' इतिः पाठः स्यात् ।

2. "वरत्रा वैणवी इति तु चाणक्यस्तन्त्राध्यक्षे उपचारादाख्यत्" इति अमरव्याख्याने क्षीरस्वामी (II. 10. 32.) । तन्त्राध्यक्षशब्देनात्र सूत्राध्यक्षोऽभिप्रेतः । वस्तुतस्तु वरत्रां बैणवीं वा प्राधान्येनैवाह चाणक्यः । औपचारिकत्वोक्तिस्तु परोक्षचाणक्यग्रन्थस्येति वेदितव्यम् ।

एषां च दासादीनाम् । **कर्षणयन्त्रैः** लाङ्गलादिभिः । **उपकरणैः** यथाप्रतीतादिभिः । **बलीवर्दैश्च असङ्गम् अ(वि)घातं कारयेत् । कारुभिश्च,** किंभूतैः कर्मारैः [1]फलाद्यर्थम् । **कुट्टकैः** तक्षभिः हलाद्यर्थम । [2]**मेदकैर्वरुटैः** शूर्पाद्यर्थम । **रज्जुवर्तकैः** हलादिबन्धनार्थम् । **सर्पग्राहैः** आहितुण्डकैः । **आदि**शब्दाद् एवंप्रकारैश्च गोपजातीयैः स्वव्यापारोपकारिभिरासङ्गं कारयेत् ॥

तेषां कारूणां कर्मफलस्य विनिपाते यद्दोषात् **फलहानं** यज्जातं **तावद्दण्डः** ॥

षोडशद्रोणमिति यदुक्तम [3]"कोष्ठागारे वर्षमानम अरत्निमुखं कुण्डम्" इति स एव द्रोणप्रमाणत्वाद् द्रोणः । ते षोडशद्रोणाः वर्षोदकेन यदापूर्यन्ते **तज्जाङ्गलानाम्** उदारकादीनां सस्यानां प्रसाधकस्य वर्षस्य मानम् । **अध्यर्धमानूपानां** चतुर्विंशतिद्रोणमानूपानां शाल्यादिसस्यानाम् । साधारणसस्यानां मध्यमं वर्षमानमित्यर्थोक्तम् । एवं जाङ्गलानूपसस्यानां (मानवर्षणानाम् इति ?) वा(तः)पनमुक्तम् । इदानीं देशविशेषापेक्षयोच्यते । **देशवापानां** तु वर्षमानं वक्ष्यत इति शेषः T. 284. M. 116. **अर्धत्रयोदशद्रोणम् अश्मकानामिति** । (वातवनगराधिष्ठानिवापसस्यानां निष्कासनम् ?)[4] ॥...........

(॥ इति सीताध्यक्षश्चतुर्विंशोऽध्यायः ॥)

---

1. फलम् अयस्कारनिष्पाद्यं हलमुखादीत्यर्थः ।

2. वेणुकारवो वरटा इति दुर्गनिवेशे चाणक्यटीका (II. 4; p. 98), वध्र्यादिकृदिति भट्टस्वामी ।

"वरुटः......व्रात्याज्जातेऽथो शाकटायनः ।
निरुच्यौष्ठ्य(व ? प)कारादिमेनं तस्यार्थमाह हि ।
मेदं, मेदो हि वैदाहान्निषाद्यां जात उच्यते । "

इति केशवस्वामी च । अत्र शाकटायनस्य मेदकशब्दनिरुक्तिप्रकारश्चेत्थं भाति—पवयोरभेदाद् वरुटः परुटः, तस्यैव परुषः, परूषकश्च ईषद्भेदाः पर्यायाः । परूषकः कौटल्येन फलाम्लवर्गे पठितः सुरासारो मेदोजनकत्वान्मेदः मेदकश्चेति ।

3. सन्निधातृनिचयकर्मणि (II. 5; p. 103) ।

4. इतः परं सीताध्यक्षशेषः, तदनुस्यूताः सुरादयः सत्ताध्यक्षाः, हस्तिप्रचारस्य द्वात्रिंशाध्यायस्य आदिमैकदेशश्च मातृकायां लुप्ताः ।

(अथ द्वात्रिंशोऽध्यायः)

.........T. 333. M. 138. (वर्षमादिभिर्युद्धकान्ति?) **साङ्ग्रामिकमिति विचारः** । तदेकदेशभूतं वक्ष्यते । (कक्ष्या)**ग्रैवेयकयोः** स्वयं विरचनात् कान्तिः स्वयं **यूथविरचनयोग्यता** चेति ॥

औपवाह्योऽष्टविधः[1] । (आचरणः) प्रतिहस्तिदर्शनाद् व्यक्तावलेपः । **कुञ्जरौपवाह्यः** विहारयुद्धादिकुशलः । **धोरणः** (आवरणशृङ्गारमष्टव्यूह-प्रकामा निगदिता?) । T. 334. यष्टिमात्रेण वाह्यते **यष्ट्यौपवाह्यः** । तोत्रेणैव केवलेन **तोत्रौपवाह्यः** । यष्टितोत्रादिभिर्विना वाह्यते **शुद्धौपवाह्यः** । मृगग्रहणार्पणवधाय कुशलो (मभातयुक्त? मार्गयुक)[2] इति । **तस्योपविचारः** एतैरष्टभिः कर्मभिः विनीतस्य । अधीरोन्मृष्टकर्मणां पुनः (नगारु? **शारद**) **कर्म** । क्षीणानां पोषणादि **क्षीणकर्म** । आश्चर्यार्थं संज्ञया यथेष्टं प्रतिचरणं **नारोष्ट्रकर्मेति** ।

व्याल(क?:)स **च** एकक्रियः आ(ल्ये ? ल्यि)कक्ति श्च अप्रतीकारः । **तस्योपविचारः** तत्र आयामिनो हस्तिपकं गृहीत्वा पलायनस्य एकेन रक्ष्यमाणत्वात् कर्मविशेषादात्मैकरक्षः । **कर्मशङ्कितः** (नास्ति नीता विनयनाकर्मणा?) । **अपराद्धः** विपरीतकर्मोपक्रमाद् दुष्टः । तस्य सम्यक् प्रवर्तनम् । **विषमः** (आवर्जितविगृह्यीवल्गितंच्छलितोद्धूतपक्षसंसृष्टप्राधान्यान्नाष्ट-विलितक्रियः?) तस्य प्रत्यापत्तिकर्म । प्रमत्तः (सोमक्रयवदुपचर्यः?) । **प्रभिन्नः** कर्मणा । **प्रभिन्नविनिश्चय** इति प्रभिद्यमानस्य कचनादिभिः परिज्ञानं प्रभिन्नविनिश्चय इति । अस्य कर्मविशेषापराधीकरणम् । **मदहेतुविनिश्चय** इति (व्रतस्यात्ययमिति सन्तापाभिजनयः?) प्रथितयोधबलानि मदकरणीयानां विनिश्चयः तस्य कर्मविशेषेण विनिश्चयः ॥

---

1. "उपस्थानम्, (सं)वर्तनम्, वधावधः हस्तियुद्धम्, साङ्ग्रामिकमिति सप्तविधेन सान्नाह्येन, औपवाह्येन—आचरणः, कुञ्जरौपवाह्यः, (अनुगतीर? आधानगतिकः), यष्ट्यौपवाह्यः, तोत्रौपवाह्यः, मार्गायुकः, शुद्धौपवाह्यः इति सप्तधा विभक्तेन" इति अवन्तिसुन्दरीकथायां दण्डी । (TSS, No. 172. p. 204.)

2. "मृगयाशीला मृगयवः तेषां कर्म मार्गयुकं पञ्चविधं हस्तिशिक्षोक्तम् । तेन युक्ताः । तत्कर्म (गो ? णि) शब्दे गौण्या वृत्त्या मार्गयुकमिति व्यपदिश्यते । ते हि स्वयं मृगयां गत्वा रूपमादाय विशस्य च स्वामिने समर्पयन्ति" इति भूमिच्छिद्रापिधाने चाणक्यटीका (II. 2; p 84.) । मार्गायुक इति दीर्घद्वितीयाच्क पाठ एव अर्थशास्त्रमातृकासु दृश्यते ।

कीदृशः पुनरसौ व्याळ इति यत्क्रियाविपन्नो (व्या)ल इति मृदुतीक्ष्णसुकुमारक्रियाभिर्यथाक्रमं मृदुमन्दभद्रेषु विपर्ययोपक्रमक्रियावचनप्रदुष्टो व्यालः । स चतुर्विधः । दन्तगात्रापरकायैर्दोषकारी शुद्धः । उपरि च(र?ल)नादिदोषकारी सुव्रतः । उभयगतदोषाणां साकल्याद् वल्गुदोषप्रदुष्ट इति ॥

तेषामेव व्यालानाम् । बन्धनविशेषम्, उपकरणानि च कटकादीनि हस्तिशिक्षाविद्भिर्नियमयेत् ॥

यानि तु सर्वेषां साधारणानि आलानानि बन्धनम् । T. 335. अपरायणम् अपराबन्धः । आदिशब्दाद् गात्रवैरामण्यवारिवर्तीनि(?) स्वस्तिकादिबन्धा द्रष्टव्याः । यन्त्रं काष्ठमयं (क्षा?दा)न्त्यर्थम् । आदिशब्दाद् रज्जुकूकलासिकादयः । क्षुरप्रमाला नक्षत्रमाला[1] । कुथा वर्णकम्बल उपरि दीयते । शरावाप इति । यन्त्रादिः सर्वतोभद्रादिः ॥

आरोहको हस्त्यारोहः । आधोरणः सौमनस्यादिपरिच्छेदकुशलः । हस्तिपकः बन्धनादिकुशलः । औपशायिको वारणानां शाययिता । औपकारिकः प्रत्यवेक्षिता, प्रेषणकारीत्यन्ये[2] । चिकित्सकानीकस्थयोरौपस्थायुकवर्गे पठितत्वात् "चिकित्सकानीकस्थौपस्थायुकवर्ग(मनु)तिष्ठेद्" इत्यत्र उद्देशवाक्ये[3] तयोर्ग्रहः प्राधान्यज्ञापनार्थम्, एतौ विशेषणानुष्ठेयाविति ॥

प्रस्थौदनमिति । औपस्थायुकानामचिकित्सकादय एव त्रयः समग्राः प्रस्थौदनादि हरेयुः । अन्यत्र चिकित्सकेभ्य इति (अन्यत्र ?) चिकित्स्यानां तु हस्तिनां मा भूत् न्यूनमात्रेति निर्हरेयुः ॥

M. 139. पथा, व्याधिना, कर्म(णा), मदप्रबन्धेन, जरया वा अभितप्तानां तु चिकित्सकाः तापापहरणेन प्रतिकुर्युः ॥

T. 336. मूत्रपुरीषादिना स्थानस्याशुद्धिः । यवसस्य भक्ष्यावय(वस्य) । आधोरणेनानवधारितायां शायनम् । तोत्राङ्कुशादिभिरनभीष्टे स्थाने

---

1. 'अथ नक्षत्रमाला स्याद्धस्तिमस्तकभूषणे' इति केशवस्वामी ।

2. "हस्त्यश्वरथविद्याविदः, विद्वत्वादेव शिक्षयितारो रक्षयितारश्च उत्तराध्यक्षाः" इति उपयुक्तपरीक्षायां चाणक्यटीका (II. 9., p. 120.) । उत्तराध्यक्षा औपरिका इति भट्टस्वामी ।

3. हस्त्यध्यक्षोपक्रमवाक्ये ।

घातः । आरोहकादिवर्गादन्यस्य नरस्य अप्रतिपन्नस्य **आरोहणम्** । **अनुचिते काले** कूलप्रचारादिना (यानम्) । **अभूमौ** पङ्कादौ । **अतीर्थे** (च्छिन्नभेदावकर-भार्जनतीर्णे?)[1] च यानमित्येव । जनबृन्दे हि संस्तव्यमिति । (मृद्धकिद्धेति?) **अत्ययस्थानमिति** । स्थानग्रहणम् असत्यपि दोषे(ण?) तेषु स्थानेष्वेव दण्डः कार्यः । जाते तु दोषे सविशेष इति ज्ञापनार्थम् । **तद्दोषैरिति** । **भक्तवेतनाद्** उचितं दण्डं निष्पादयेत् ॥

तिस्र इति, चत्वारो मासाश्चातुर्मासी । (क इति धातवो मरुतः?) वर्षाहेमन्तग्रीष्माः । तेषां **सन्धिषु** पौर्णमासीषु । (तिस्रो नीराजनाः) भवन्ति कार्तिक्यां फाल्गुन्याम् आषाढ्यामिति, अर्थाद् भूतबलिस्तु द्वादशसु । (तम?सोऽ)प्यमावास्या(सु) इत्येव ॥

मूलस्य तस्य **परीणाहद्विगुणमायामेन** प्रारभ्य । **कल्पयेदिति** यदपेक्षया प्रायो वर्षविधानम् । अत्र विधिस्तु शिक्षायां कृतप्रपञ्चः । **अब्दे** (द्व्यर्धे) **नदीजानाम्** । (महाबुद्धिं ? पञ्चाब्दे) **पर्वतचारिणामिति** । अर्थात् त्र्यब्दे चतुरब्दे वा मिश्राणामित्यूह्यम् ॥

॥ इति हस्तिप्रचारः त्रिंशं प्रकरणम् ॥

॥ (द्वा)त्रिंशश्चाध्यायः ॥

॥ अथ (एकत्रिं?त्रयस्त्रिं)शोऽध्यायः ॥

T. 337. **अश्वाध्यक्षेण रथाध्यक्षो व्याख्यातः** । पण्यागारादि-निबन्धनेन युद्धे मृतामृतप्रत्यवेक्षणेन च सादृश्यात् ॥

स रथाध्यक्षो **रथकर्मान्तान् कारयेत्** । **दशवितस्तिविस्तारः (रथः)** । कथं विज्ञायते । **द्वादशवितस्त्यायाम** इति **अन्तरशब्देनायामाभिधानात्** । तथा चोक्तम् —

स्यन्दनस्य प्रमाणं स्याद्विस्तारायामतः पृथक् ।
(यश्चा? पञ्चा)रत्निः परिग्राह्यः षडरत्निः (स) उत्तमः ॥

इति । **तस्मादुत्तमाद् एकैकवितस्त्यवरायामा आ(षडन्तराद्) सप्त रथा** भवन्ति । तदेवात्र प्रमाणं सामान्येन भवति । **अन्यस्त्वाह—एकैकवितस्तिह्रासाद्**

1. छिन्नसेतावत्रकरमार्जनतीर्थे इति पाठः स्यात् ।

27

विस्तारह्रासो भवति आ चतुर्वितस्तिविस्तारादिति[1] । कथं पुनः षड्वितस्त्यायामेन शय्यानां योग इति चेत् कूबरस्य पञ्चबन्धस्य (स्थानत्वाददोषः?) । तथा चोक्तम्—कूबरस्य चतुर्हस्तम् । (पञ्चवितस्ति कथं द्वित्रिदण्डफल एवैकतदन्तर इति?) ॥

देवरथः देवोत्सवादिषु तत्प्रतिमारोहाय वा योग्यः । पुष्यरथः क्रीडाविहारादिप्रयोजनः । सङ्ग्रामयोग्यः साङ्ग्रामिकः । परिचङ्क्रमार्थः पारियाणिकः । संयानाय प्रभवति अतिशयक्रीडार्थं (सां)यानिकः वैनयिकः.... ...मादीनां योग्यार्थ इति । एतान् षड् रथविशेषान् कारयेत् ॥

T. 338. M. 140. तथा इष्वस्त्राणां धनुषाम् । प्रहरणानां शक्त्यादीनाम् । आवरणानां वर्मादीनाम् । उपकरणानां युगवरत्रादीनां कल्पनाः विद्यात् । तथा सारथि........रथ्यानामश्वानां यथास्वं कर्मस्वायोगं विनियोजनं विद्यात् । आ कर्मभ्यश्चेति अभृतानां रथकारादीनां यावत् कर्म परिसमाप्तं तावत् भक्तवेतनम् । एभ्यो दद्यादित्यर्थः । भृतानां च अस्येयम् ईदृशी योग्या, अस्येयं रक्षा, इदमस्य अनुष्ठानम्, इदमस्य अर्थकर्म, इदमस्य मानकर्मेति । विद्यादित्येव ॥

॥ रथाध्यक्ष एकत्रिंशं प्रकरणम् ॥

॥ (एकत्रिं?त्रयस्त्रि)शश्चाध्यायः ॥

॥ अथ द्वात्रिंशोऽध्यायः? ॥

एतेन पत्त्यध्यक्षो व्याख्यातः । कर्मस्वायोगभक्तवेतनादिपरिज्ञान-सादृश्यात् । विशेषतस्तु मौलादिबलानां प्रत्येकम् इतरेतरापेक्षया च कर्म युद्धकर्म । T. 346. (एतोमपदं ग्रहणानि इतरथा ह्याकरकाणिवेत्रे?)[2] (अथ समाहर्तृप्रचारः)........तेषु च गृहेषु । एतावच्चातुर्वर्ण्यं ब्राह्मणादयः । एतावन्तश्च एतादृश एषाम् (हतः? आहत्य) कृषिवाणिज्यादिक इति इयत्ताश्च विद्यात् ॥

---

1. अन्याचेयं व्याख्या भट्टस्वामिनादृता ।

2. इतः परं सेनापतिप्रचारः, मुद्राध्यक्षः, विवीताध्यक्षः, समाहर्तृप्रचारस्य आदिमैकदेशश्च मातृकायां लुप्ताः ।

एवं जनपदचतुर्भागं स्यानिकश्चिन्तयेत् । यथा गोपाः पञ्चग्रामीं दशग्रामीं वा तथा जनपदचतुर्भागं चत्वारोऽध्यक्षाः स्थानिकसंज्ञाः समाहर्तृ-प्रयुक्ताश्चिन्तयेयुः ॥

गोपस्थानिकप्रचारेषु प्रदेष्टारः कण्टकशोधनोक्ताः कारणिकाः सहायत्वेन नियुक्ताः कार्यस्य यथोक्तस्यानुष्ठानम्, आयानां ग्रहणं च कुर्युरिति ॥

॥ इति समाहर्तृप्रचारः षट्त्रिंशं प्रकरणम् ॥

॥ अथ सप्तत्रिंशं प्रकरणम् ॥

........T. 347. M. 241. समाहर्तृप्रचारपूर्वकाः गृहपतिक-वैदेहकतापसव्यञ्जना(नां? :, तेषां) व्यवहारा उच्यन्ते । गृहपतिकव्यञ्जना-श्चेत् क्षेत्रकुलाग्रं विद्युः । कथमिति—यदि (ए)तावत् प्रमाणम् एतावत् फलमिति मानसंजाताभ्यां क्षेत्राणि । एतावन्ति भुज्यन्ते एतावन्ति परिहा(रा? री)णीति भोगपरिहाराभ्यां गृहाणि । एतावन्तो ब्राह्मणाः क्षत्रिया वा इति जात्या, एतावन्तः कर्षका इति कर्मणा कुलानि । तथा तेषामेव कुलानामाश्रयस्य एतावन्तः पुरुषा इति, अस्य अयमायो व्यय इति च विद्युः । प्रस्थितागतानां स्त्रीपुरुषाणां निर्गतकारणं प्रविष्टानां प्रविष्टकारणम्, तेषां चारादिति । तथा आनर्थ्यानां गतागतं कः केन संसृज्यत इति समाहर्त्रे निवेदयितुं विद्युः ॥

T. 348. M. 143. स्वभूमिजानामिति राजभूम्युत्पन्नानाम् ख(नि)जाः शङ्खादयः । वनजाः शैलेयकमुस्तादयः । कर्मान्तजा वस्त्रादयः । क्षेत्रजाः शाल्यादयः । तेषां परिमाणमर्घं वानुप्रविश्य विद्युः । परभूमिजानां तु इयता व्यापारेणेदं निष्पादितमिति कर्मप्रमाणम् । शेषं गतार्थम् ॥

एवं तापसव्यञ्जनाः समाहर्तृप्रयुक्ताः कर्षकादीनां शौचाशौचं विद्युः । पुराणचोरव्यञ्जनाश्चेति चोरादिविश्वासनार्थं वयं चोरा एव, इदानीमशक्ताः कर्तुं चौर्यमित्येवं ख्यापयन्तः ॥

T. 349. तत्संस्थाश्च अन्याः संस्थाः परप्रयुक्ताश्चिन्तयेयुः । यस्मादेतास्तासां समानयोनयो विश्वसनीया इत्यर्थः ॥

॥ इति गृहपतिकवैदेहकतापसव्यञ्जनप्रणिधयः सप्तत्रिंशं प्रकरणम् ॥

॥ पञ्चत्रिंशश्चाध्यायः ॥

॥ अथ षट्त्रिंशोऽध्यायः ॥

T. 350. यथा समाहर्ता चतुर्धा विभज्य जनपदं चिन्तयेत् तथा **समाहर्तृवन्नागरिको** नगरनियुक्तः **नगरं चिन्तयेत्** । समाहर्तृप्रयुक्त एव । तत्र कनिष्ठादिनाम(चिदिःभिरि)ह कुलविभागमाह—**दशकुलीमिति** । **स गोपः**, M. 134. **तस्यां** दशकुल्यां **स्त्रीपुरुषाणां** जात्याद्युपनिबन्धैः **जङ्घाग्रायादि विद्यात्** ॥

दुर्गचतुर्भागं स्थानिको नागरिकप्रयुक्तः **एकैकश्चिन्तयेत्** ॥

धर्मावसथिन इति । धर्मार्थं कृतपरिग्रहा(र्थानां ?:) **पाषण्डान्निवेद्य** गोपस्थानिकेभ्यः **वासयेयुः** । स्वयं तपस्विनोऽनिवेद्य वासयेयुः ॥

T. 351. **कारवः शिल्पिनश्च स्वकर्मस्थानेषु** कर्मशालासु, न गृहेषु । **स्वजनं** नान्यमागन्तुकं **वासयेयुः** । **वैदेहकाश्चान्योन्यं स्वकर्म** (स्थानेषु ।) .... (सविकारमाह ?) आपणादन्यत्र रात्रौ (वा) **विक्रेतारम्** । (अनु)**युक्तश्च** (यः) **स्वकरणं** न करोति तं **निवेदयेयुः** गोपादिभ्य इत्येव । .... ना अस्वकरणं लवणस्य वालुकाप्रक्षेपात् द्रव्यकरणमेव गोपादिभिः स्वयं **परिज्ञातमेव** वासयेयुः । **अतिव्ययकर्तारम् आश्चर्यकर्माणञ्च निवेदयेयुः** ॥

चिकित्सको यस्य गृहे प्रतिकारयति स च गृहस्वामी **(प्र)च्छन्नव्रण-प्र(तीकारकारयितारम्) अपथ्यकारिणञ्च निवेद्य गोपस्थानिकयोः** तद्दोषेण **मुच्यते** । **अन्यथा** अव्यवस्थाकारित्वात् तद्विनयात्ययः ॥

T. 352. **प्रस्थितागतौ** च गृहस्वामी **निवेदयेत्** । **अन्यथा** यो हि दोष उत्पद्यते तमसौ **भजेत** अनुभवेदित्यर्थः । **क्षेमरात्रिषु** अनुत्पन्नभोक्ता स्वयमप्यनिवेदयिता **त्रिपणं** दण्डं **दद्यात्** ॥

पथिकोत्पथिकाः पथ्युत्पथे च नागरिकपुरुषाः **बहिरन्तश्च नगरस्य देवगृहादिषु सव्रणम्**, चौर्याद्युपकरणसहितम्, **उद्भाण्डं** तृणादिभारप्रच्छादित-भाण्डम्, **उद्विग्नरूपम्, अतिस्वप्नम्, अध्वक्लान्तम्** अदृष्टपूर्वं भीतं **गृह्णीयुः** ॥

एवं नगराभ्यन्तरे **शून्यनिवेशने** साधारणस्थाने, **आवेशने** सुवर्णका(रा)दिघटनाशा(खाःला)याम्, **शौण्डिकयाद्यावासेषु** विचारणां **कुर्युः** परिशोधनार्थम् ॥

M. 145. अग्निप्रतिषेधं ग्रीष्मे रक्षार्थं कुर्युः । तत्रापि मध्यमयोरह्नश्चतुर्भागयोः प्रचण्डयोः अग्निकरणे पणस्य अष्टभागो दण्डः । पूर्वपश्चिमयोस्तु प्रशान्तत्वान्न दोषः । तस्यामपि वेलायामवश्यकर्तव्येऽग्नौ ग्रामाद् बहिरधिश्रयणम् उपनिपातप्रतीकारोक्तमेव[1] कुर्युः ॥

T. 353. प्रतिगृहम् उदकपूर्णानां पञ्चघटादीनाम् अकरणे पणपादो दण्डः । भाण्डानाञ्च अग्निप्रतीकारोपकरणानामकरणे पादो दण्ड इत्येव ॥

तृणकटच्छन्नाद्यपनयेद् ग्रीष्म इत्येव । अग्निजीविनः सुवर्णकारादीन् न हैरकस्थान्[2] आवासयेत्, सर्वेषामन्येषामनर्थो मा भूदिति । स्वगृहद्वारे गृहस्वामिनः अनर्थरात्रौ वसेयुरसंचारम(व?)गच्छन्तः । कुटव्रजा उदकपूर्णघटसंघाताः । सहस्रमिति प्रभूतोपलक्षणार्थम् । चतुष्पथे पुरद्वारे राजपरिग्रहे वाहनागारादौ ॥

T. 354. तत् प्रदीप्तमनभि(करसो? सरतो)[3] गृहस्वामिनः । द्वादशपणो दण्डः । चतुष्पणोऽवक्रयिणः अन्यतः क्रीत्वा गृहं वसतो[4] दण्डः । गृहस्वामिनां प्रमादाद् दीप्तेष्वशेषेषु चतुष्पञ्चाशत्पणो दण्डः ॥

प्रदीपितक इति गृहाणां प्रदीपिता तेन अ(न्ये?ग्नि)ना वा निजौषध्या ॥

पांसुन्यासे रथ्यायामष्टभागो दण्डः पणस्येत्यर्थः । पङ्कोदकसन्निरोधे पादः । रथ्यायामित्येव । राजमार्गे द्विगुणः । उभयं तत्रेत्यर्थः ॥

राजमार्गादिषु विष्ठयावघातस्य यथोत्तरमेकैकपणोत्तरा दण्डाः । मूत्रेणावघात(क?)स्य सार्धका दण्डाः ॥

---

1. "ग्रीष्मे बहिरधिश्रयणं ग्रामा(:? त्) कुर्युः" (IV. 3.) ।

2. ऐरकस्थान् एरकाख्यतृणच्छन्नगृहवासिनः सुवर्णकारादीन् नावासयेद् इत्यर्थः स्यात् । भट्टस्वामी तु एकस्थान् इति पठित्वा "अग्निजीविनः कांस्यायोजीविनः एक(स्मिन्?)शाले निवातप्रदेशे कृताग्निप्रतीकारे सर्वान् समानीय कर्म कारयेत्" इति व्याचष्टे ।

3. "उह्यमानम् अलाबुदृतिप्लवगण्डिकावेणिकाभिस्तारयेयुः । अनभिसरतां द्वादशपणो दण्डः (iv. 3) इत्यादावापदो निस्तारणेऽभिसरतिः प्रयुज्यते ।

4. भाटकेन वसत इति भट्टस्वामी ।

भैषज्येन व्याधिना भयेन वा दूरं गन्तुमसमर्था न दण्ड्याः ॥

T. 335. मार्जारादीनां मृतानां नगराभ्यन्तरोत्सर्गे यथोक्ता दण्डाः ॥

मार्गविपर्यासे प्रतिमार्गविपर्यासे शवद्वारादन्यतश्च (त्रीहिद्युयमेन ? बहिर्नयने) दण्डः । द्वाःस्थानां द्विशतो दण्डः प्रेतानिवारणात् । श्मशानादन्यत्र प्रेतस्य तस्य न्यासे अन्यदेशे दहने वा दण्डः । दुर्गनिवेशे हि यथावर्णं स्थाननियमो व्याख्यातः[1] ॥

M. 146. षण्णालिक[2]मुभयत इति । प्रदोषे नालिकात्रयं पश्चार्धे नालिकात्रयम् इति उभयतो रात्रेः षण्णालिकाः, (प्रायामभूत् ?) परस्य तू(र्य)शब्दे कृतेऽपि प्रथमपश्चिमयोर्द्वारदेशे प्रसिद्धे (र)क्षणे[2] संचारे यत् ताडनं संचरतो ग्रहणं तत्र सपादपणो दण्डः । मध्यमयामिकं (द्विगुणं) मध्यमयो रक्षणताडने अर्धतृतीयपणो दण्डः । बहिश्चतुर्गुणं[3] राजगृहाद् विदूरे पञ्चपणमित्यर्थः ॥

T. 356. शङ्कनीये देशे शून्यप्रत्यासन्ने(न ?) च (प्रपूर्वकृतख्यातिं गृहीत्वा ततः किं निमित्तं सनाथीत्युपचर्यानुयुक्ते?) परीक्षेत ॥

राजपरिग्रहसमीपगमने नगररक्षाणाञ्च प्राकारादीनाम् [4]आरोहादीनाम् आरोहे गृहीतस्य दण्डः ॥

सूतिकानिमित्तं चिकित्सार्थं संचरन्तः, तथा प्रदीपयानारूढः, नारीसहायः, तूर्यप्रेक्षार्थं समुद्रा न ग्राह्याः ॥

अपररात्रिषु [5]उत्सन्नरात्रिषु (यज्ञलब्धये ?) उत्सवप्रेक्षार्थम् , प्रच्छन्नवेषाः, विपरीतवेषाः, प्रव्रजिताः, निर्लोहदण्डमात्रहस्ताः, शस्त्रहस्ताश्च मनुष्याः (विशेषवत् ?) । दोषतः (दण्ड्याः) ॥

---

1. उत्तरः पूर्वो वा श्मशानवाटः दक्षिणेन वर्णोत्तराणाम् इत्यत्र । (p. 99.)
2. षण्णालिकमिति रक्षणताडनमिति च चाणक्यटीकापाठः शुद्धिमत्तरः ।
3. अन्तश्चतुर्गुणम् इति केरलभाषाटीकापाठः ।
4. आरोहो नगाद्युच्छ्रितो देशः ।
5. अपररात्रेषु इति पाठः स्यात् । "पूर्वरात्रव्यवहारिणाम्" (III. 1.) इत्यादिः कृतसमासान्तः प्रयुज्यते । चाररात्रिषु इति मुद्रितकोशपाठः ।

T. 357. द्विगुण इति । रक्षणताडनमेव दण्डो यथोक्ताद् द्विगुण इत्यर्थः । स्त्रिया दण्ड एवायम्, तामधिमेहयतां कामयमानानां दण्डः । कुलस्त्रियम् …………(उत्स)वादेर्निमित्तात् ज्ञातिगृहे । सञ्चर(न्तिः?न्तीम) तामधिमेहयताञ्च स एव दण्डः ॥

चेतनिकं बेरादिगृहम्, अचेतनिकञ्च प्राकारादिपतनात् । रात्रिदूषकस्य दोषानुरूपो दण्डः । प्रमादस्थाने च ॥

नित्यमुदकस्थानाद्यवेक्षणं कार्यम् । तथा नष्टं प्रपलायितं स्वामिभिः प्रस्मृतम् अपहृतं चोरादिभिः यत् तेषाम् आ स्वामिनरि(स? सर)प्राप्तेः रक्षणं कार्यम् ॥

बन्धनस्थानां बालादीनां अनाथानाञ्च । यस्मिन् राजा जातः तस्मिन् दशमैकान्नविंशति(मयो? तमयोर)घनक्षत्रयोः पौर्णमास्यां रक्षाबन्धनविक्रमणार्थं विसर्गः । पुण्यशीलाः केचित्तु (त एव वा?) प्रतिमाव्यशपथादि-(खण्डन्वेषणमाहयैः? दण्डनिष्क्रयणमाहुः) तन्निष्क्रयं वा बन्धा(द्)[1] दद्युः ॥

T. 358. M. 147. दिवसे दिवसे पञ्चरात्रे वा बन्धनस्थान् विशोधयेत्, कः किं ददाति किंसमर्थो वेति । कर्मणा कायबन्धेन शारीरेण । हिरण्यानुग्रहेण वा ॥

अपूर्वदेशस्याधिगमे प्राप्तौ । मोक्ष इति बन्धनस्य । विनापि कर्मादिदण्डेन धर्माभिवृद्ध्यर्थं विधीयते । धर्मलाभो ह्यन्येभ्यो लाभेभ्यः श्रेयानिति ॥

॥ इति नागरिकप्रणिधिरष्टत्रिंशं प्रकरणं समाप्तम्
षट्त्रिंशश्चाध्यायः ॥

आदितः सप्तपञ्चाशोऽध्यायः

॥ समाप्तं चाध्यक्षप्रचारो द्वितीयमधिकरणम् ॥

---

1. बन्धस्त्वाधौ इति केशवस्वामी ।

॥ धर्मस्थीयं—तृतीयमधिकरणम् ॥

॥ प्रथमोऽध्यायः ॥

T. 1. M. 147. अध्यक्षाधि(प्र ?)करणेन प्रपञ्चवता योगमभिधाय क्षेमाय धर्मस्थीयकण्टकशोधनयोगवृत्तानि त्रीण्यधिकरणान्युच्यन्ते । तेष्वध्ययं प्रथमतमः, यदर्थाद् विनीतशास्त्रानुविधायिभिर्व्यवहारैः प्रजानां क्षेमो विधीयत इति धर्मस्थीयं तावदुच्यते । अत्रापि प्रमाणानां व्यवहाराणां स्थापना व्यवस्थितिरिति, विवादपदानां च निबन्ध इति प्रकरणद्वयमशेषप्रकरणोपक्रमकार्यम् एकेनाध्यायेन विधीयते ॥

तत्र अधिकरणाधिकारीयं सूत्रमाह—धर्मस्था इति सहकारित्वेन निश्चिताः । ननु राज्ञ एवात्र कर्तृत्वम्, यथोक्तम्—द्वितीये पौरजानपदानां कार्याणि पश्येत् । (अधि. १. अध्या. १९.) इति । सत्यम्, राज्ञ एवाधिकारः, तस्य तु सहकारिणश्च देशव्यवहितानां व्यवहाराणामिति तावत् स्वयं राज्ञः प्रयोजककर्तृत्वमा(च?ध्य)त इति प्रयोज्यकर्तारः सदा कार्यदर्शने कार्यविपर्यासप्रतिविधानार्थं कल्पिताः स्युः । यथोक्तम्—

> यतः स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।
> सोऽस्य कार्याणि संपश्येत् सभ्यैरेव त्रिभिर्वृतः[1] ॥

धर्मस्थैरित्यर्थः । तस्माद्राज्ञः सहकारित्वेन प्रयोज्यकर्तृत्वे विषयीक्रियन्ते ॥

त्रयस्त्रय इति स्थाने व्याप्त्यर्थं द्विर्वचनम् । त्रित्वसङ्ख्या च एकस्य यथेष्टम् अनवग्रहचारित्वाद् द्वयोः संहतयोरसंहतयोर्वा राजकार्यविनाशित्वात् । चतुरादिष्वपि (दश ? दोषः) ॥

(अमात्या इति) अमात्योत्पत्तौ सहाध्यायित्वादिभिर्यथासम्भवम् उक्तलक्षणाः । जनपदसन्धौ अन्तपालदुर्गे । संग्रह इति कार्वटिके द्रोणमुखे स्थापयेत् जनपदनिवेशोपलक्षिते[2] । व्यावहारिकानिति व्यवहारयोग्यान् अष्टादशव्यवहारपदनिबन्धादीन् पदार्थान् नि(श्चये ? श्चिनु)युः ॥

---

1. यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।
   तदा नियुञ्ज्याद् विद्वांसं ब्राह्मणं कार्यदर्शने ॥
   सोऽस्य कार्याणि संपश्येत् सभ्यैरेव त्रिभिर्वृतः ।
   सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ॥

   इति मुद्रित मनु पाठः; (VIII. 9,10.)

2. "दशग्रामीसंग्रहेण संग्रहं स्थापयेत्" इति जनपदनिवेशाध्याये कौटल्यः । (II. 1.)

T. 2. तिरोहितकृतः दातृ प्रति उपह्वरकृतः । गृहीतदेया(दा)नाय (साक्ष्य)सान्निध्यकृ त: । अरण्यकृतः । उपाधिकृतः च्छद्म, गृहान्तःकृतः यत्साहसं प्रयच्छति । उपह्वरकृतः असाक्षिकार्यकः, एवंविधो व्यवहारो न कोऽपि दाप्य इति प्रतिषेध्यार्थपक्षे (पा)तयेयुः । (तथा चिरव्यवहार इति यद्वाध्यक्षोऽननुज्ञाता तावति तयोर्व्यवस्थाभेदेन दण्डः?) । श्रोतृणां साक्षिणाम् । (स ?)श्रद्धेयानां (श्म ?)संभाव्यन्यायानां (स्व ?)दण्डो द्रव्यव्यय एव व्यवहारनिवृत्तिरित्यर्थः ॥

प्रसङ्गनिवृत्तये अस्यापवादमाह—परोक्षेणेति परोक्षाधिना स्थावरेण जङ्गमेन (वा) कृतम्, क्षेत्रं दासीं वा गृहीत्वा शतं देहीति यद् ऋणग्रहणं तत् तिरोहितमपि सिध्यति ॥

न तु परोक्षेण प्रतिभूप्रचारापरोक्षेण मूल्येन वा क्रयादिप्रत्यायितकर्तृतया ये व्यवहारा व्याख्याताः, तानेवोपपादयति—ते सर्वे सिध्येयुरिति । दायेति भर्तॄणां वा स्थितये विभागो दायः । कारुहस्ते करणाद्यर्थं सुवर्णादेर्निक्षेपः । उपनिधिरिति न्यासस्य दानार्पणे । विवाहसंयुक्ता धनदानादयः । तथा स्त्रीणामनिष्कासिनीनां M. 148. व्याधितानां वा अमूढसंज्ञानां षडेव अन्तर(गार)कृताः सिध्येयुः ॥

T. 3. तथा साहससंयुक्ताः, गृहानुप्रवेशाहरणादयश्च तद्युक्ताः, कलहयुक्ताः, विरुद्धश्चारो विचारः संग्रहणं तद्युक्ताः, राजाज्ञया च ये दानग्रहणादयः, पूर्वरात्रव्यवहारिणां च(सारिता पूर्वितो?) अ(दी? ही)ना[1] रात्रिकृतानुविचारार्हत्वात् सिध्येयुः ॥

(मूढाजीविषु) च्छद्मव्यवहारिषु अतिसन्धानार्हेष्वित्यर्थः ॥

(स?) मिथःसमवायेन एकमत्या, असाक्षि(कृ)ता अपि सिध्येयुः ॥

अतोऽन्यथा न सिध्येयुरिति यथोक्तविशेषणाभावात् कृता अपि न सिध्येयुरिति नियमार्थं वचनम् ॥

अपाश्रयवद्भिश्च कृताः, न सिध्येयुः । अनेन कर्तृविशेषापेक्षया प्रतिषेधमाह । केन इत्यस्य विशेषः—पितृमातृव्यवहारयोः सपितृकेण

---

1. "अथाहीनो नृलिङ्गकः । द्विरात्रादिषु यज्ञेषु प्राक् त्रयोदशरात्रतः" । इति केशवस्वामी ।

पुत्रेण । पुत्रवता निवृत्तप्रसवेन पित्रा । (निष्कलेन) कलम् इति बीजपर्यायः । भ्रात्रा[1] कनिष्ठेन अविभक्तांशेन । पतिमत्या प्राप्तव्यवहारपुत्रया च स्त्रिया । अपाकृतव्यवहाराभ्यां दासाहितकाभ्यामिति । संबन्धात् स्वामिद्रव्यप्रतिषेधो नात्मद्रव्यस्य । T. 4. एवम् अभिशस्तप्रव्रजितव्यसनिभिश्च (पि ? अपु)त्रादिभिः । अन्यत्र निसृष्टव्यवहारेभ्यः अपाश्रयैरनुज्ञातव्यवहारेभ्यः पुत्रादिभ्यः ॥

तत्रापि स्वतन्त्रेष्वपि । क्रुद्धादिना न सिध्येयुः । पृथग् यथोक्ता दण्डा इति कर्तुः कारयितुश्च पूर्वः साहसदण्डः । श्रोतॄणामर्ध इति व्यवस्थादृढीकरणार्थम् ॥

पुनरपवादमाह—स्वे स्व इति ब्राह्मणानां ब्राह्मणेष्वित्यादि । करणस्थाने व्यवहारवेलायां स्वकरणकृता इति सजातीयसाक्षिमध्ये कृताः । संपूर्णाचाराः अयं गौरयमश्वश्चेति । दृष्टरूपाः दृष्टप्रमाणाः दृष्टलक्षणाः दृष्ट(प्रदृष्ट ? पष्ठ)वाहादिगुणा व्यवहारा निरवद्याः सिध्येयुः ॥

T. 5. पश्चिमं चैषामिति करणात् पौनःपुन्ये साक्षिपत्रलेख्यादिगुणयुक्तात् पश्चिमं करणम् (अ)कृतपूर्वम् दत्ताधिकेन वा तत्र पूर्वपूर्वमेव श्रद्धेयमिति ॥

॥ इति व्यवहारस्था(पना) ॥

विवादपदनिबन्धः

M. 149. कथमित्याह—तत्रेति । तद्यथा—श्रीपुष्यमित्रस्य करणं श्रद्धेयम् । (सन्दंशेन?) (चे?शु)क्लपक्षपञ्चम्यां (धँ?ध)र्माधिकरणे वणिग्भिक्षदत्ते लग्नकेन मागधेन ब्राह्मणेन कौण्डिन्यगोत्रेण अध्यापकविष्णुभूतिना आवेदकेन संव्यवहार्यवर्षे अष्टमे व(ह ? स)न्ते (फाल्गुनशुषमाषककरणो वैपवणिश्च ?) सुभद्र आवेदयतीति अभिलिख्य (आदौ एवं चतुरंशहवति गोभूमिलग्नकोष्ठादत्त्वा?)

---

1. 'कलं शुक्रे चरमधातौ' इति मेदिनी, 'देहधात्वन्तरे' इति केशवस्वामी । क्लीबेन भ्रात्रेत्यर्थः । निष्कुलेनेति प्रामादिकः पाठो मुद्रितकोशेषु ।

कृतसमर्थाव(त्ता ? स्था)भवतः[1] पश्चात् पूर्वपक्षोत्तरपक्षसाक्षिप्रश्ना(ना)नुपूर्व्या यथाक्रमं लेखयेत् । लिखितांश्च एवं भवतोक्तम् अनेन प्रत्युक्तम्, पृष्टे साक्षिभिरेवं कथितम्, इति दृढीकरणार्थमवेक्षेत । निविष्टश्चेति एकधर्म-संबन्धादेकवचनम् ॥

T. 6. भङ्गहेतूनाह—(नि)बद्धं (पद)मुत्सृज्येति । ऋणं धारयतीति निबध्य प्रतिपादयितुमसमर्थः उपनिहितमेव द्रव्यं नार्पयतीति अन्यत् पदं संक्रामति ।

पूर्वोक्तमिति प्रतिश्रुत्य यन्न ददाति तत् किमृणं न भवतीति पश्चिमेन अर्थेन अतिसन्धत्ते व्यंसयति[2] ।

परवाक्यमनभिग्राह्यमिति वणिज्यार्थम् अनेन मत्तो माषकशतकमुद्धृ-तमिति अभियुक्तोऽस्मि । किमनेन वणिज्यार्थमेतदेव प्रतिपादयेत् । अन्यथा मया जितमित्यन्यथा प्रधानमुपतिष्ठते ।

प्रतिज्ञाय देशं देशयितारं साक्षिणं निर्दिशेत्युक्ते कृतसंगानत्वान्न तावन्निर्दिशति ।

हीनं देशम् अन्वयम्, बन्धुमित्रादिह्यापृच्छ्यताम्, किं ते(हे? न), इत्यन्यमुपस्थापयति ।

उपस्थिते साक्षिणि विशेषणं ब्रवीति न (मत्वा?) मयापि धारयतीत्युक्तं नैव सहस्रं लिखितमिति अर्थवचनमपव्ययते ।

साक्षिभिरभिहिते (छिन्दन्तीति?) विनाकारणेन ममैते न प्रमाणमिति ।

असंभाष्ये निर्जने देशे मिथः उपजापार्थं संभाषते । इति साक्षिवचनमन्तरेणापि गतानुमानेन भङ्गस्य हेतवः, तस्यैव वचनाद्वा ।

---

1. कृतसमर्थावस्थयोरिति इदं कौटल्यवचनम् "उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये," इति याज्ञवल्क्यस्मृतौ (II. 10.) परिवर्तितं भाति । "कृतावस्थो गृहीतप्रतिभूः" इति मेधातिथिः (मनु. VIII. 60.) । समर्थेन प्रतिभुवा कृतप्रत्यर्पणबन्धस्येत्यर्थः ।

2. वञ्चयतीत्यर्थः ।

परोक्तस्य पराजयदण्डः पञ्चबन्धः । परिवा(द? दित)स्य वस्तुनः पञ्चभाग इत्यर्थः । यदि पूर्वमभियुज्य च एत्य वा स्वयं भङ्गं प्रतिपद्यते तदा पूर्वस्मादर्धः ।

T. 7. साक्षिप्रतिवादिसन्निधापनार्थानां भृतानां या दिवसभृतिः पणाष्टभागः, पथिभक्तं भक्तदानम् (एत्रादिवस ?) कालापेक्षया अर्घविशेषात् । तदुभयं (राम्यान् ?) नियम्यः पराजित एव दद्यात् ॥

अभियुक्तः असमाप्तव्यवहारः अभियोक्तारं न प्रत्यभियुञ्जीत, अन्यत्र कलहादिभ्यः । अहमनेनापि पूर्वं पश्चादाकुष्ट इति ब्रूयात् । साहसेऽपि अभियुक्तश्चेद् ब्रूयादनेन (अद्वियेचार्यादिकृतमितोऽवेक्ष्य?) । सार्थमपि अनेन द्रव्यं कूटमुद्रया अपनीतम् । अभियुक्तश्चेद् ब्रूयादनेनापि सारम् असारेण प्रतिच्छादितम् अनेनापीति, उभयमनुसर्तव्यम् । जनपदादि(स)मवायेऽपि अनेन समवायो भिन्नः, अनेनापीति, उभावप्य(नुम)न्तव्यौ । न चाभियुक्ते अभियोगोऽस्ति द्वितीयेनाभियोक्त्रेत्यर्थः ॥

प्रत्युक्तः (प्रीतरात्तः? परोक्तः) स्यात् । भङ्गकारणमाह—कृतकार्यविनिश्चय इति । एवं मया प्रतिपादनीयमिति प्रागेव अवधृतविचारपदनिश्चय इति । न प्रतिब्रूयात् । (इतरस्तु तमभिस्यतीति योजयति प्रतीत्यथ न स्मरति आगमय्यानेनाद्यष्टव्यवहारः सुवाच्यम् ?) ॥

असावपि चिरं नोपेक्ष्यः, तद्दर्शयति—तस्य अप्रतिब्रुवतः देशकालापेक्षया त्रिसप्तरात्रमेव उपेक्ष्यम्, T. 8. अत ऊर्ध्वं त्रिपणं द्वादशपणपरं शनैर्दण्डं वर्धयेत् । न भङ्गमवतारयेत् । परोक्तदण्डं कृत्वेति यथोक्तं दण्डम् । ततोऽभियोक्तारमिति । तस्मात् सकाशाद् द्रव्याणि यथाभियोगम् अभियोक्तारं प्रतिपादयेत् लम्भयेत् । (अन्यत्र) वृत्त्युपकरणेभ्य इति । कर्षकादीनां कृषिकरणादिद्र(व्यार्थे? व्येभ्य) इत्यर्थः ॥

तदेव निष्पतत इति । तदेव वृत्त्युपकरणम् अन्ततः पलायमानस्य अभियुक्तस्य अभियोक्तारं लम्भयेत् । निष्पातसमकालमिति पलायनसमकालं परोक्त (भावः) । M. 150. प्रेत(यत?)स्य (तिच?) कृत्वा अभियोगकर्म

तस्य जातव्यसनस्य वा निष्पतितस्य साक्षिवचनात्[1] सत्यासत्यतामुपलभ्य (परेभ्योऽभिभवः भङ्गमङ्गं वा?) अपराधयेदित्यर्थः । असारं त्वभियुक्तं परोक्षञ्च तदीयं स्वयं दण्डं दत्त्वा अभियोक्ता कर्म कारयेद् आ स्वद्रव्यशुद्धेः ॥

आधिं वा सकाममिति। यो ब्रूयाद् ऋणाय मा आध(मस्य? त्स्व) इति तम् अन्यत्र आधिना प्रवेशयेत् । (रक्षोघ्ना)दिभिः प्रत्ययैर्वा कृताकृतरक्षं कर्मणा प्रतिपादयेत्, असंप्रत्ययार्थं पुनर्वचनम् । ब्राह्मणं तु न कर्म कारयेत् । न चतुर्थाश्रमस्यायं यथोक्तभङ्गदण्डः ॥

T. 9. लोकस्याचाररक्षणहेतुत्वात् । तदभावे नश्यतां सर्वधर्माणां प्रवर्त(कं?कः) धर्मसंस्थ(मि?इ)त्यर्थः । नार्थभूषणं राजधर्म एव ॥

पश्चिमः पूर्वबाधक इति । धर्मस्य विवादनिर्णयार्थस्य व्यवहारः । तस्यापि चरित्रम् । तस्यापि च मन्त्रम् । तत्रापि राजशासनम् ॥

तत्र अर्थिप्रत्यर्थिनोरन्यतरस्य । सत्य इति सत्यप्रतिबद्धास्तुलादयोऽपि शपथाः प्रोच्यन्ते । तैरसाक्षिकं व्यवहारं निर्णयेत्, स धर्म इत्युच्यते । व्यवहारस्तु साक्षिषु प्रमाणेषु स्थितम्, तेषु शपथो नाश्रयणीयः । चरित्रं पुंसां संग्रहे एकवाक्यतया स्थितम्, इयमत्रास्तु व्यवस्थेति । यथोच्यते—

"देशस्य जातेः सङ्घस्य धर्मो ग्रामस्य वापि यः ।
उचितस्तस्य तेनैव दायधर्मं प्रवर्तयेत् ॥" (अधि. ३. अध्या. ७)

इति । (तत्र साक्षिणेति अन्तर्भया दैवानुसारिणी यामाज्ञामर्थापराधा आज्ञा अर्थशास्त्रपतयः?) शासनं तेन सर्वं बाध्यते ॥

"तस्माद्धर्मान् यथेष्टेषु......पार्थिवः ।
अनिष्टं त्वप्यनिष्टेषु तद्धर्मान्न विचारयेत्[2]॥"

इति ।

---

1. 'साक्षिवसनात् । सारम्' इति, 'साक्षिवचनमसारम्' इति च उभावप्यपपाठौ मुद्रितकोशेषु ।

2. तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥
इति मुद्रितमनुकोशपाठः । (VII. 13)

यच्चोक्तम्— अनर्थसंयुक्तं च व्यवहारे न्यू ....हि[1] ।

राज्ञः स्वधर्मो(यत?क्तम्) अधिकं वा दधतः स्वर्गाय, अन्यथा (पत)नीयः स्यादित्यर्थः ॥

अस्यैव समर्थनमाह —दण्डो हि केवल इति । तस्मात् (शुद्धो मनो न मुञ्च?) पथा असंकरेण रक्षति राज्ञा चान्ततः केवल इति । यस्माच्छुद्धः अत्रैव च यथादोषं समं धृतः न द्वेषादधिकं स्नेहाद्वा न्यूनीकृत इत्यर्थः ॥

T. 10. धर्मेणेति सत्येन साक्षिवचनेन चरित्रेण न्यायेन धर्मकामनया आ मूलात् शास्त्रानुरोधिना अर्थानुशासनेनेत्यर्थः ॥

पश्चिमः पूर्ववाधक इति व्यासङ्गनिवृत्त्यर्थमाह—संस्थयेति । यत्र चरित्रेण वर्णाश्रमेण वा शास्त्रं साक्षिवचनादि प्रतिबद्धं तत्र धर्मेण निर्णयेत् । वर्णाश्रमधर्माविरोधे तु साक्षिभिश्चरित्रेण वेत्यर्थम् ॥

शास्त्रं विप्रति(पत्ति)शास्त्रं व्यवहा(रे?र:) धर्मन्यायेन चेद् विरुध्यते तत्र शास्त्रोक्तं वा न्याय्यं (यतनी?वाचरणी)यम्, (वायु? न्याय)निरुद्धमुभयं हि नश्यति । नाचरणीयमित्यर्थः । तद्यथा—

"अपुत्रा शयनं पत्युः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणाद् द्रव्यं दायादास्तूर्ध्वमाप्नुयुः ॥" (कात्यायनः)

इति धर्मशास्त्रवचनम्[2] । "तीर्थोपरोधो हि धर्म(पर? वधः ।)" (अधि. ३. अध्या. ४) इत्यर्थशास्त्रवचनम् । तत्र न्यायः चारित्ररक्ष(ण?णा)समर्था चेद् अर्थशास्त्रोक्तमाचरणीयम् । असमर्था न क(यातिम् ? दाचिद्) उपरोद्धव्या, उपरोधे हि अननुज्ञातैः संसृज्यत इति ॥

1. "वश्येन्द्रियः......अनर्थसंयुक्तं च व्यवहारं वर्जयेत्," इति विनयाधिकारान्तर्गते राजर्षिवृत्ते कौटल्यः (I. 7.) ।

2. धर्मशास्त्रवचनमपीदम् "अपुत्रा पतिशयनं पालयन्ती गुरुसमीपे स्त्रीधनम् आ आयुःक्षयाद् भुञ्जीत । आपदर्थं हि स्त्रीधनम् । ऊर्ध्वं दायादं गच्छेत् ।" (III. 2.) इति कौटल्यग्रन्थपङ्क्त्या शब्दतोऽर्थतश्च साम्यं वहति ।

T. 11. उक्तोपकारमाह—दृष्टदोष इति । प्रागल्भ्यं कलहकार. । तस्मादनेनैवायं कलहः कृत इति । स्वयं पदस्य प्रतिपत्तिः । स्वपक्षपरपक्षयोः वादिप्रतिवादिनोः पक्षयोः अनुपूर्वकः प्रश्न आर्जवं वा यस्य । संभावि(तं?तो) हेतुः । (पूर्वानुशये तस्मादनेनैवाह?) । सर्वाभावे शपथाश्चार्थस्य (मन्त्रो? मिथो) निर्णयस्येति ॥

पूर्वं निबद्धस्य उत्तरेण वचनेन व्याघाते, साक्षिवक्तव्ये स्यालादीनाम् उद्देशे, चारहस्ताच्च निष्पाते आरक्षिभ्योऽपक्रमणे, प्रदेष्टव्यः पराजयः परिच्छेत्तव्यः एवंकारिणो भङ्ग इति ॥

॥ इति प्रथमं प्रकरणम्, प्रथमश्चाध्यायः[1] ॥

---

1. चाणक्यटीकाया इयानेवादर्शः समुपलब्धः । अन्ते च माधवयज्व-कृतायाः कौटलीयव्याख्याया सप्तमाधिकरणीयषष्ठाध्यायान्तिमं वाक्यं सप्तमाध्यायादिमं च वाक्यशकलं लिखितमस्ति । यथा—

गूढवधे स्वर्णलक्षणादिदानम् इत्येतास्तूष्णीं युद्धस्य लक्षणम् असाधारणरूपम् इत्यर्थः । इति षाड्गुण्ये नयचन्द्रिकायां संहितप्रयाणिकं परिपणितादिसन्धयश्च । षष्ठोऽध्यायः ॥

तदेवं परिपणितादिभेदसन्धिम् ... ... सम्प्रति तेषामेव द्वैधीभाविकानां समहीनांशलाभ...... ॥